# Narada Upanishad

# नारदोपनिषत्

## Document Information

Text title : nAradopaniShat

File name : nAradopaniShat.itx

Category : upanishhat, vishhnu, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# नारदोपनिषत्

अथ प्रणिपत्य नारदो ब्रह्माणं प्रायुङ्क्त । अधीहि भगवन्मे
किं पवित्राणां पवित्रं केन सुकरेणामृतत्वमेति ।
स होवाच साधुत्वे नियोगं सुलभं पवित्रं सुलभं सुकरं
तद्विष्णुक्षेत्रं तत्र मृदं श्वेतं “उद्धृतासि”
इप्युद्धरेत् । अमृतमेव श्वेतमृद्भवति । मूलमन्त्रद्वयं च
“विष्णोर्नुकम्,” “गन्धद्वाराम्” इत्येताभिरभिमन्त्रयेत् ।
देवपितृकमाण्यारभमाणस्त्रयी नित्यमूर्ध्वपुण्ड्रं च कुर्यान्मन्त्रैः
केशवादीनाम् । तत्कर्म सफलं च भवति । न रक्षांसि गृह्णीयुः ।
तदेवमभ्युक्तं भवति । नासादिकेशान्तमूर्ध्वपुण्ड्रं विष्णोः
स्थितस्य चरणद्वयाकृति । आयतमेकाङ्गुलं पादतरोरस्य मूलम् ।
तदुत्पन्ने द्वे रेखे । तथैव च धृतं विष्णुना वा “आदित्यवर्णे
तपसः” इति हरिद्रां श्रीफले धारयेत् । तज्जलेन श्रीबीजेन
सम्मृज्य तत्सूक्ष्मरेखां धारयेत् । ते द्वे शाखे हंसवर्णे
गायत्रीत्रिष्टुब्दैवत्ये आत्मपरमात्मदैवत्ये लक्ष्मीनारायणदैवत्ये
दर्शपूर्णमासेष्टके इष्टापूर्तक्रिये मातृकायामेतावदेवोपलब्धम् ॥

(वैष्णव-उपनिषदः)

इति नारदोपनिषत् समाप्त ।

Proofread by Kasturi navya sahiti

*Narada Upanishad*
pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*